© 2018 IJSRST | Volume 4 | Issue 7 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# बुद्धेः स्वरूपम्



**डॉ. कृष्णकान्त तिवारी**
**सहायकाचार्यः (संविदा)**
**राष्ट्रियसंस्कृतसंस्थानम्**
**भोपालपरिसरः, भोपालम्**

**शोधालेखसारः** – साम्प्रतिके युगे बुद्धिर्ज्ञानरूपा मन्यते। मानवः खलु जगत्प्रपञ्चकस्य नायकः ईश्वरस्तु निर्देशकः। बुद्धिसन्दर्भे विविधाः प्रयोगाः मनोविद्भिः कृताः विद्यन्ते। एषा मानवस्यानन्या योग्यता वर्तते। शिक्षाया आयोजनं बालानां बौद्धिकविकासाय क्रियते। अन्येषु विकासेसु बौद्धिकविकासोऽत्यधिकं महत्त्वं धारयति। शिक्षया बुद्धेः धनात्मको वर्तते सहसम्बन्धः। बुद्धिसम्प्रत्ययस्य दुर्बोधतां वीक्ष्य स्पीयरमेनमहोदयेन सम्यगेवोक्तं यत् बुद्धिपदस्यानेकेऽर्थाः भवन्ति परमिदानीं नास्तीति।

**मुख्य शब्दः** – मानवः, नायकः, बुद्धिः, मनोविज्ञानशास्त्रः, थार्नडाइकमहोदयः, अधिगमः।

मानवः खलु जगत्प्रपञ्चकस्य नायकः ईश्वरस्तु निर्देशकः। ईश्वरप्रदत्तव्यस्थायाः प्रयोगार्थं मानवाय धीः दत्तवान्। स्ववातावरणेन कथं समायोजनं करणीयम् अस्यामेवावस्थायां मानवान्तकरणस्य ज्ञानस्य बहिः प्रयोगः एव धीः वर्तते। धीस्तु बुद्धिः वर्तते। अन्तर्स्थितानां वायोरणु संयोगनिष्पन्नभूतायां छायोपात्तारूपसत्तायां मायायाः प्रभावः एव विचारेषु आपतति, ते विचारादयः एकस्मिन् पक्षे यदा कार्यं कुर्वन्ति, तदा तेषां समग्रस्वरूपमेव बुद्धिः पदवाच्यं भवति। अतः वैयक्तिकविषमतायां बुद्धिः प्रधानं कारणमस्ति। बुद्धिभेदेन प्राणिनः भिन्नाः सन्तीति सर्वविदितमेव। पशुपक्ष्याद्यपेक्षया मानवः अधिकबुद्धिशाली भवति। अत एव तेषामुपरि नियंत्रणं स्थापयित्वा तान् स्वाधीनीकृत्य तेषां सेवां प्राप्नुवन्तः वर्तन्ते। तत्रापि मनुष्येषु पुनः बुद्धिभेदाः नितरां वर्तन्ते।

साम्प्रतिके युगे बुद्धिर्ज्ञानरूपा मन्यते। एषाऽनुमानिता ज्ञानशक्तिरूपेणापि स्वीक्रियते। यतोहि एतस्याः ज्ञानं प्रत्यक्षरूपेण नैवभवति, प्रत्युत क्रियाभिः व्यवहारैश्च जायते। यदा कश्चन बालकः स्वकीयं पाठयविषयमन्येभ्यः शीघ्रमवगच्छति, तर्हि स बुद्धिमान् इति कथ्यते। यश्च समस्यायाः शीघ्रं समाधानं प्रस्तोतुं शक्नोति, सोऽपि मेधावी मन्यते, यस्याः अभिव्यक्तिः जीवनस्य विविधेषुसन्दर्भेषु भवति। मनोविज्ञानशास्त्रे कृतभूरिपरिश्रमेण राइलमहोदयेन प्रतिपादितं यत् बुद्धया कस्यचिद् गुणस्य बोधो न भवति, प्रत्युत एतया प्रवृत्तेः सूचना एव प्राप्यते

**बुद्धिपरिभाषा :**

बुद्धि मानवस्यार्मूत्ता योग्यता वर्तते। यद्यपि बुद्धेः परिभाषा दुष्करा वर्तते, तथापि वैज्ञानिकाः एतस्याः विविधाः परिभाषाः दत्तवन्तः।

बकिंघममहोदयस्तु– ''अधिगमक्षमतैव बुद्धिः'' इति प्रतिपादितवान्

कॉलविनमहोदयमतानुसारम् ''बुद्धिः सा क्षमता वर्तते या जनं नूतनायां परिस्थितौ समायोजने सहाय्यं करोति''

पिन्टरमहोदयानुसारम् बुद्धिः जनस्य सा क्षमता वर्तते या तं जीवनस्य नूतनासु परिस्थितिषु समुचितरूपेण समायोजने सहायतां करोतीति।

मनमहोदयस्तु ''गतिशीलस्याभियोजनस्य क्षमतैव बुद्धिः'' इति मन्यते। टर्मनमहोदयः ''अमूर्तचिन्तनस्य क्षमतैव बुद्धिं'' इति प्रतिपादितवान्। स्टर्नमहोदयस्तु ''नूतनासु दशासु स्वचिन्तनक्षमतां सुव्यवस्थितं करणस्य योग्यतैव बुद्धिः'' इति निरूपितवान्

वेशलरमतानुसारम् ''जनस्य सोद्वेश्यं कार्यं'' सम्पादनस्य, विवेकपूर्णचिन्तनस्य, स्वकीयेन वातावरणेन सह सम्यग् समायोजनस्य योग्यतानां समग्रतैव बुद्धिः इति वर्तते।

बिनेमहोदयानुसारम् ''बुद्धेस्तात्पर्यं निर्णयक्षमता, सद्बोधनम् उपयुक्तस्य तर्कस्य प्रस्तुतीकरणम्, व्यवहारपटुत्वम्, अग्रगामित्वं परिस्थितिषु च समायोजनस्य क्षमता च'' इति वर्तते। रेबरमहोदयानुसारम्– ''बुद्धेः अभिव्यक्तिः विवेके, कल्पनायां, अन्तर्दृ, अनुकूलने च भवति'' इति एवं प्रकारेण एतासु परिभाषासु ''बुद्धिः विवधानां ज्ञानशक्तीनां तद्यथा–अधिगमशक्तिः, स्मृतिः चिन्तनं, समायोजनशक्तिश्चेत्येतेषां रूपं वर्तते।''

अत्र वैश्लरमहोदयस्य परिभाषा सर्वथोपयुक्ता मन्यते। एतया परिभाषया बुद्धेः स्वरूपं सम्यग्निरूपितं वर्तते। वस्तुतः बुद्धेरभिव्यक्ति अधिगमेन, चिन्तनेन, समायोजनेन च भवति। एताः सर्वा एव योग्यता जनेषु समानाः नैव भवन्ति, प्रत्युत तासां परिणामे महदन्तरं भवति। जनानां विविधमात्रासु स्थिताः तदा एव योगयताः बुद्धिरित्युच्यते।

वस्तुतः बुद्धिः वंशानुक्रमेण वातावरणेन च प्रभाविता भवति। अस्मिन् सन्दर्भे वहवः प्रयोगाः मनोविदिभः कृताः वर्तन्ते। परं निश्चयेन तद् वक्तुं न शक्यते यदेषा वातावरणेन प्रभाविता भवतीति। अत एवं बर्टप्रभृतयः विद्वान्सः जन्मजाता योग्यतारूपेण स्वीकुर्वन्ति। परं वातावरणस्य महत्तवमपि सर्वैः स्वीक्रियत एव।

**बुद्धेः विकासः**

बुद्धेः सम्प्रत्यस्य विकासे एकोनविंशतिशताब्धां वर्तमान्योः हरबर्टस्पेंसरफ्रांसिसगाल्टनमहोदयोः योगदानं महत्त्वपूर्णं वर्तते। एतयोरेव सर्वप्रथमं बुद्धिः व्यक्तेः विशियोग्यताभ्यः भिन्ना एका सामान्ययोग्यता रूपेणोपकल्पिता वर्तते। एकोनविंशतिशताब्द्याम् अन्ते जैक्सनमहोदयेन प्रसिद्धतांत्रिकविज्ञानीरोरिंगटन महोदयेन च एनं दृष्टिकोण सम्यक् रूपेण स्वीकृतम्।

विंशतिशताब्द्या आरम्भे कार्लपियर्सनमहोदयेन प्रस्तावितस्य कारकविश्लेषणपद्धतेरनुप्रयोगः स्पीयरमहोदयेन (ईसवीयेऽब्दे) विधाय सामान्ययोग्यतायाः बुद्धेर्वा तत्त्वस्य प्राधान्यं प्रतिपादितम्। तस्मिन्नेवको फ्रांसदेशे बिनेमहोदयेन बुद्धिमापकं परीक्षणं निर्मितम्। तदनन्तरं मनोविद्भिः बुद्धिविषये प्रचलितेषु विचारेषु परिष्कारं कृतम्। द्वितीयस्य विश्वयुद्धस्यानन्तरम् अमेरिकादेशस्य मनोवैज्ञानिकाः बुद्धेः विशिानां क्षमतानां संरचनानाञ्च अध्ययने बलं दत्तवन्तः विंशतिशताब्द्याः अन्तिमेषु वर्षेषु अन्यैः सह गोलमेनमहोदयः संवेगात्मकबुद्धेः आध्यात्मिकबुद्धेश्च सम्प्रत्ययं प्रतिपादिवान् तत्र आधुनिकसमये आध्याम्मिकबुद्धिविषये बहुकार्यं प्रचलति।

बुद्धेः विकासस्य आधाराः

योग्यतानां स्वरूपं वंशधर्मेण तस्य पोषणं तु पर्यावरणेन प्रभावितं मन्यते। जनस्य बुद्धेनिर्धारिणं तस्य जन्मकाले भवति परं तस्मिन् विकासस्य मात्रा पर्यावरणजन्येषु तत्त्वेषु निर्भरा मन्यते। व्यक्तेः बौद्धिकं सामाजिकं सांस्कृतिकञ्च पर्यावरणं तस्य बुद्धेर्पोषकं भवति।

बुद्धेः वितरणसम्बन्धे सिद्धान्तोऽयं वर्तते सुनिश्चितो यत् प्रायशः जनानां सामान्या एव बुद्धिर्भवति। निश्चितबुद्धयो मन्दाश्च अल्पा एव भवन्ति। बुद्धेस्तिसृणां भेदानां विवरणेदं ज्ञायते यत् एतेषां परस्पर सम्बन्धः अधिको वर्तते। मानवानां विविधेषु कार्येषु एताबुद्धयः सम्मिलिताः भवन्ति। भिन्नता तु केवलं मात्राय एव भवति। कासुचन क्रियासु मूर्त्तबुद्धेः कासुचित् क्रियासु अमूर्तबुद्धेः एव आवश्यकता भवति। एतदेव तत्त्वं सामाजिकबुद्धेः सन्दर्भे मन्यते। अत्र आध्यात्मिकबुद्धौ अमूर्तबुद्धेः प्रयोगः दृश्यते अमूर्तबुद्धिशालिनः छात्राः प्रायः आध्यात्मिकाः अपि वर्तन्ते।

## बुद्धेः सिद्धान्ताः

बुद्धेः केचन सिद्धान्ताः वर्तन्ते तेषांः वर्णनं क्रमशः प्रस्तूयते–

### 1. एककारकसिद्धान्त :

एतद् सिद्धान्तानुसारं व्यक्तौ वर्तमानस्य समग्रसामर्थ्यस्य मूलभूतं कारकम् एकमेव भवति। चक्रवर्ती एक एवं सन्नपि संपूर्णं साम्राज्यं यथा पालयति तथा बुद्धिशक्तिः एका सत्यपि सर्वकार्यक्षमा भवतीति अस्य सिद्धान्तस्य आशयः भवति।अस्य सिद्धान्तस्य प्रवर्तकेषु बिने – टर्मन स्टर्नमहोदयाश्च प्रमुखाः वर्तन्ते। अस्य सिद्धान्तानुसारेण – ायो जनः गणितज्ञो भवति स एव कविः सङ्गीतज्ञः क्रीडको वापि भवितुं शक्नोति। यतो हि बुद्धिस्तु एकैव वर्तते। परञ्च द्वितीयपक्षे अद्यतनकाले अस्य आदरो नास्ति यतो हि एकत्र प्रकृबुद्धिः तथैव अपरत्र न दृश्यते। उदाहरणार्थं आंग्लभाषायां संस्कृते वा प्रकृबालकः गणिते अत्यन्तनिष्कृबुद्धिरपि दृश्यते।

## 2. द्विकारकसिद्धान्त

एतत्सिद्धान्तानुसारं बुद्धिशक्तौ कारकद्वयं भवति सामान्यकारकं विशिष्टकारकं च।तत्र सामान्यकारकम् एकस्मिन् व्यक्तिविशेषे सर्वेष्वपि अंशेषु समानं भवति। परं व्यक्तौ व्यक्तौ सामान्यकारके भेदा भवति।विशिकारकं तु एकस्मिन्नेव व्यक्तिविशेषे विभिन्नतया भवति। एकस्मिन् क्षेत्रे अधिकं स्यात् अपरस्मिन् क्षेत्रे न्यूनं स्यात्।बुद्धमापने सामान्यकारकमेव प्रधानमिति एतत् सिद्धान्तानुयायिनः अभिप्रयन्ति। अस्यसिंद्धान्तस्य बिटेनदेशस्य चार्ल्सपीयरमेन महोदयः प्रवर्तकः वर्तते। स्पीयरमेन महोदयमते काचित्मानसिका शक्तिर्नूनमेव वर्तते या हि जनं सर्वासु दशासु समानरूपेण सहायतां करोति। एतस्या एव मानसिकशक्तेर्नाम सामान्यतत्त्वं सामान्यबुद्धिर्वा वर्तते। एतत् सिद्धान्तानुसारं सामान्यबुद्धिस्त्वेकैव भवति परं विशिष्टबुद्धिः विविधा भवितुमर्हतीति। उदाहरणार्थं विश्वेश्वरय्या महाशयस्य सामान्य कारकं सर्वेष्वपि अंशेषु सामान्यम् आसीत्। परं तस्य विशिष्टकारकं अभियंतृक्षेत्रे विशिरूपेण आसीत्। अत एव सः विश्वविख्यातः अभियंता अभवदिति उच्यते।

## 3. बहुकारकसिद्धान्तः

अस्यसिद्धान्तस्य प्रवर्तकः थार्नडाइकमहोदयः वर्तते। ँ सः प्रचलितस्य बुद्धेर्द्वितत्त्वस्य सिद्धान्तस्य खण्डनं विधाय बहुतत्त्वसिद्धान्तं प्रतिपादितवान् तन्मते बुद्धिरनेकैस्तत्वैः निर्मिता वर्तते। वस्तुतः बुद्धिर्हि अनेकाषां लघुयोग्यतानां समुच्चयो वर्तते।तेन प्रतिपादितं यत् एताः योग्यताः स्वतन्त्राः भवन्ति। प्रत्येकं योग्यता कस्याश्चित् बौद्धिकक्रियायाः आंशिकरूपेण सम्पादनस्य योग्यतां धारयति। अत एव क्रियां पूरयितुं अनेकाः मानसिक्याः योग्यताः साकमेव परं स्वतन्त्ररूपेणैव सहायिकाः भवन्ति। यथा अनेकाभिरिकाभिः भवनस्य निर्माणं भवति परं प्रत्येकमिटिका भवनस्य निर्माणे स्वतन्त्रं योग ददाति। यथा भवननिर्माणे अनेकाः इष्टिका सम्मिलिताः भवन्ति तथैव बुद्धिरपि अनेकाभिः लघुभिः मानसिकयोग्यताभिः विरच्यते।

## समूहतत्त्वसिद्धान्तः

यानि तत्त्वानि मानसिकासु योग्यतासु तु नैव वर्तन्ते परं विविधासु क्रियासु समाविशन्ति तान्येव समूहतत्त्वानीति नाम्ना प्रसिद्धानि सन्ति। अस्य सिद्धान्तस्य प्रवर्तकेषु थर्स्टनमहोदयस्य नाम विशिो वर्तते। खण्डविश्लेषणविधिना मानसिकयोग्यतानां कृतैः परीक्षणैस्तेन प्रतिपादितं यत् मानसिक योग्यतासु एकं मूलतत्त्वं समान्यरूपेण विद्यमानं भवति, यत्तु ताः क्रियाः मनोवैज्ञानिकं क्रियात्मकञ्च एकत्वप्रदानं करोति। स च तान् अन्याभ्यो मानसिकक्रियाभ्यः पृथक्करोति। एवं भवति। थर्स्टमहोदयेन सप्तसंख्यकानां तत्त्वानाम् उल्लेखः कृतः। यथा

- शाब्दिकं तत्त्वम्
- स्थानतत्त्वम्
- अङ्कीय तत्त्वम्
- स्मृतितत्त्वम्
- शब्दप्रवाहसम्बद्धं तत्त्वम्
- प्रत्यक्षीकरणसम्बद्धं तत्त्वम्
- समस्यासमाधानयोग्यतातत्त्वम्

**1. बर्टमहोदयस्य सिद्धान्तः**

बर्टमहोदयेन स्पीयरमैनमहोदयस्य द्विकारकसिद्धानतस्य खण्डनं विधाय तयोःस्थाने मध्यवर्तीतत्त्वानाम् उल्कल्पना कृता। अस्य मते संज्ञानात्मकस्य व्यवहारस्य सर्वविधविश्लेषणेन चत्वारि तत्त्वान्येतस्मिन् दरीदृश्यते। यथा – सामान्यतत्त्वम् . समूहतत्त्वम् . विशितत्त्वम् . त्रुटिप्रदर्शकतत्त्वं चेति।

**न्यादर्शसिद्धान्तः**

अस्य सिद्धान्तस्य प्रवर्तकः जी.एल. थॉमसनमहोदयो वर्तते। सिद्धान्तानुसारं बुद्धिः विविधैः स्वतन्त्रैः तत्वैः निर्मीयते। जनानां बौद्धि कोव्यवहारः विविधाभिः स्वतन्त्रयोग्यताभिः निर्भरो भवति। तदा हि स्वकीये विस्तारे सीमिताः भूत्वापि विविधेषु कार्येषु प्रवि जायन्ते। फलतः कश्चिदेकेन परीक्षणेन बौद्धिकतत्त्वानां केवलमेकं न्यादर्शमुपस्थितं भवति। भिन्ने परीक्षणे कश्चिदन्यं न्यादर्शम् उपस्थितं भवति। परीक्षणेषु यदि अधिकाः सामान्यखण्डाः प्राप्यन्ते तर्हि एतेन सामान्यखण्डस्य प्रतीतिर्भवति।

**अधिकमितसंरचनाया : सिद्धान्तः**

वर्नमहोदयः ईसायाः तमेऽब्दे एनं सिद्धान्तं प्रतिपादितवान्। तेनोक्तं यत् ''लघुसमूहतत्तवानि सदैव'' बृहत्समूहतत्त्वेभ्यः नैव प्रादुर्भवन्ति। तन्मते तत्त्वानां संरचना एकस्मिन् अधिक्रमे प्रदर्शयितुं शक्नोति, मानवीययोग्यतानां संरचनायाः अधिक्रमस्य शीर्षे सामान्ययोग्यता भवति। ततः बृहत्समूहतत्त्वानि प्रदर्शितानि भवन्ति। तदनन्तरं लघुसमूहतत्त्वानां स्थितिः भवति। अन्ते च विशितत्त्वानां विद्यमानता भवति।

**1. बुद्धिनिर्माणसिद्धान्तः**

सिद्धान्तस्यास्य प्रतिपादिको गिलफोर्ड महोदयः वर्तते। – मध्ये एतत् सिद्धान्तानुसारं बुद्धे कार्यत्रयमस्ति। – यथा

- कृत्यानि

- विषयाः
- उत्पाद्यानि इति।

तत्रापि पुनः कृत्येषु पञ्चप्रकाराः वर्तन्ते। यथा–

- संज्ञानम्
- स्मृतिः
- विस्तृतचिन्तनम्
- सङ्कीर्णचिन्तनम्
- मूल्याङ्कनम् इति।

अनन्तरं विषयेऽपि पञ्चप्रकाराः वर्तन्ते। यथा

- चित्रसम्बन्धः
- दृश्यात्मकः
- प्रतीकात्मकः
- अर्थप्रधानविषयः
- व्यावहारिकः इति।

तत्र उत्पाद्येषु षट् प्रकाराः सन्ति। यथा–

- प्रमाणानि
- वर्गाः
- सम्बन्धाः
- क्रमाः
- रूपान्तराणि
- आशयाः इति।

एवं बुद्धिनिर्माणसिद्धान्तानुसारं बुद्धिकार्ये एकस्मिन् यत्किमपि कृत्यं, यः कश्चित् विषयः, यत्किञ्चिदुत्पाद्यञ्च भवितुमर्हति। अतः आहत्य सामर्थ्याणि भवन्तीति महाशयस्य अभिप्रायः अस्ति।

**(1) बुद्धेर्वृद्धिः**

विविधैः परीक्षणैः सिद्धमिदं यद्यथा वयो वर्धते तथा तथा बअुद्धावपि वृद्धिः परिलक्ष्यते। परं बुद्धिः स्वकीयां परिपक्वतां विविधे काले प्राप्नोति। प्रायशः षोडशवर्षात् विशंतिवर्षात्मके वयसि बुद्धिः स्वकीयामुन्नतां स्थितिमाप्नोति। अत्र विद्वत्सु ऐकमत्यं नास्ति। निश्चितवयसः अनन्तरं बुद्धेरुदग्रा वृद्धिः विरमति परं क्षैतिजावृद्धिः यस्मिन् हि ज्ञानकौशलयोः अर्जनं भवति सा त्वाजीवनं प्रचलति।

(2) एवंरूपेण शंका भवति यत्–किं बुद्धिर्नास्ति?

**ज्ञानम्** – ज्ञानं बुद्धिर्नास्ति। यद्यपि ज्ञानप्राप्तिः बुद्धो निर्भरा भवति तथापि बुद्धिस्तु ज्ञानेन भिन्ना भवति। एषा ज्ञानस्यावाप्तौ सहायिका भवति।

**स्मृतिः** – स्मृतिरपि बुद्धिर्नास्तिः एतदपि सम्भवं वर्तते यत् प्रतिभाशालिबालकस्य स्मृतिर्मन्दा भवेत परं तस्यान्याः शक्तयो विकसिताः स्युः। मन्दस्य बालकस्य स्मृतिस्तीव्रा भवितुमर्हति।

**कौशलम्** – बुद्धिः कौशलं नास्ति। एषा तु कौशलादिभन्ना भवति। कौशलानि तु सतताभ्यासेन प्राप्तुं शक्यते।

वस्तुतः बुद्धिर्हि अनुमानितं तत्त्वं वर्तते। बुद्धिमतां व्यवहारेणापि बुद्धेः सत्तायाः परिज्ञानं भवति। यतो हि बुद्धिमन्तो जागरुकाः भवन्ति। तेषा चिन्तनक्षमता विकसिता भवति। तेऽमूर्त्ते चिन्तनेऽपि विदग्धाः भवन्ति। ते आत्मनो मूल्याङ्कनं कर्त्तु प्रभावोः भवन्ति। तेषामात्मविश्वासो दृढ़ो भवति। तेऽभिप्रेरिताः भवन्तिः तेषामधिगमः अन्तर्दुयितो भवति। बुद्धिमन्तो नूतने आविष्कारे शक्ताः भविन्त। तेऽन्येषां निर्देशनेऽपि रुचिमन्तो भवन्ति। एतेनापि बुद्धेर्लक्षणं ज्ञायते। बुद्धेः एतत् विवेचनमनन्तरं

बुद्धिभेदा :– प्रस्तूयन्ते।

बुद्धेर्परिज्ञानं व्यवहारमाध्यमेन भवति। कस्यापि जनस्य कार्यं व्यवहारं वा वीक्ष्यैतदनुमीयते यत् ''स कियत् बुद्धिमान् वर्तते?'' इति। विद्वदिभः बुद्धिमतां प्रकृतिमवलोक्य बुद्धेर्भेदाः कृताः वर्तन्ते। बुद्धिस्त्रिघा विभज्यते–मूर्त्तबुद्धिः अमूर्त्तबुद्धिः सामाजिका बुद्धिश्चेति।

**(1) मूर्त्तबुद्धिः**

मूर्त्ताः बुद्धिः व्यावहारिकाबुद्धिः इत्यपि कथ्यते। मूर्त्तवस्तूनां विषये चिन्तनं तथा चावश्यकतानुरूपं तस्मिन् परिवर्तनसम्पादनमपि विधीयते। सतादृशी योग्यता कुशले मूर्तिकारे अभियन्तरि च स्पतयावलोक्यते। सर्वासु हस्तकलासु मूर्त्तबुद्धेरावश्यकता भवति। मूर्त्तबुद्धेः प्रदर्शनं बालानां व्यवहरे भवति। विद्यालयेषु केचन बालकाः हस्तकलायां नैपुण्यं केचन तु शैथिल्यं प्रदर्शयन्ति। एतत्सर्व मूर्त्तबुद्धेः विद्यमानतां सूचयति।– एवं चेतनस्याधारः अस्यामेव परिलक्ष्यते।

**(2) अमूर्त्तबुद्धिः** अमूर्त्तानां तत्त्वानां विषये चिन्तनस्य क्षमतेव अमूर्त्तबुद्धिरित्युच्यते। सर्वेषु जनेषु क्षमतयं समाना नैव भवति। दार्शनिकेषु लेखकेषु कविषु चामुर्त्ता बुद्धिःस्फुटं प्राप्यते। कवयः दार्शनिकाश्च स्वकीयायां पूर्वकल्पनायां

बुद्धेरस्या एव प्रयोगं कुर्वन्ति। कल्पनायाम् अमूर्त्तबुद्धौ च घनिष्ठः समबन्धो वर्तते। बालेष्वपि एतायाः क्षमतायाः अस्तिस्वं दृश्यते।

**(3) समाजिका बुद्धिः**

बुद्धिस्तृतीयो भेदः थॉर्नडाइकमहोदयेन ईसायाः तमेऽब्दे विकसिता सामाजिका बुद्धिरिति तदादृशी बुद्धिः राजनैतिकेषु धार्मिकेषु। सामाजिकेषु च नेतृषु स्फुटं परिलक्ष्यते। एतायाः बुद्धेः प्रयोगेन व्यापारिणो व्यापारे राजनीतिज्ञाश्च राजनीतौ सफलाः जायन्ते। ते स्वकीयानामनुयायिनामपि सङ्घटनं कर्तुं प्रभवति। एवं सामाजिका बुद्धिः जनस्य सामाजिकेऽभियोजने साहाय्यं करोति। बालकेषु सामाजिकबुद्धेर्विकासे विद्यालयानां महत्त्वपूर्णं स्थानं वर्तते।एवं प्रकारेण –

बुद्धिसन्दर्भे विविधाः प्रयोगाः मनोविद्भिः कृताः विद्यन्ते। एषा मानवस्यानन्या योग्यता वर्तते। शिक्षाया आयोजनं बालानां बौद्धिकविकासाय क्रियते। अन्येषु विकासेसु बौद्धिकविकासोऽत्यधिकं महत्त्वं धारयति। शिक्षया बुद्धेः धनात्मको वर्तते सहसम्बन्धः। बुद्धिसम्प्रत्ययस्य दुर्बोधतां वीक्ष्य स्पीयरमेनमहोदयेन सम्यगेवोक्तं यत् ''बुद्धिपदस्यानेकेऽर्थाः भवन्ति परमिदानीं नास्तीति''। एतेन बुद्धेस्पष्ट तया अपि बोधो भवति। अत एव माइल्समहोदयो बुद्धिं बहुरूपात्मकं सम्प्रत्ययम् इति निरूप्य बुद्धेर्व्यापकतां प्रदर्शितवान्।

## सन्दर्भाः-

1. शिक्षामनोविज्ञानम्
2. आधुनिकं शिक्षामनोविज्ञानम्
3. शिक्षामनोविज्ञानम्
4. प्रगतशिक्षामनोविज्ञान
5. अमरकोश
6. हलायुद्धकोश
7. अर्थशास्त्रम्